# shrIpItAmbarAShTottarashatanAmastotram

# શ્રીપીતામ્બરાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : pItAmbarAShTottarashatanAmastotram

File name : pItAmbarA108.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : utkaTashambare nAgendraprayANatantre viShNushaNkarasa.nvAde

Latest update : May 08, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીપીતામ્બરાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીભગવાન ઉવાચ ।
ઇતીદં નામસાહસ્રં બ્રહ્મન્સ્તે ગદિતં મયા ।
નામ્નામષ્ટોત્તરશતં શ‍ૃણુષ્વ ગદિતં મમ ॥ ૧॥

ૐ પીતામ્બરા શૂલહસ્તા વજ્રા વજ્રશરીરિણી ।
તુષ્ટિપુષ્ટિકરી શાન્તિર્બ્રહ્માણી બ્રહ્મવાદિની ॥ ૨॥

સર્વાલોકનનેત્રા ચ સર્વરોગહરાપિ ચ ।
મઙ્ગલા મઙ્ગલાસ્નાતા નિષ્કલઙ્કા નિરાકુલા ॥ ૩॥

વિશ્વેશ્વરી વિશ્વમાતા લલિતા લલિતાકૃતિઃ ।
સદાશિવૈકગ્રહણી ચણ્ડિકા ચણ્ડવિક્રમા ॥ ૪॥

સર્વદેવમયી સાક્ષાત્સર્વાગમનિરૂપિતા ।
બ્રહ્મેશવિષ્ણુનમિતા સર્વકલ્યાણકારિણી ॥ ૫॥

યોગમાર્ગપરાયોગીયૌગિધ્યેયપદામ્બુજા ।
યોગેન્દ્રા યોગિનીપૂજ્યા યોગસૂર્યાઙ્ગનન્દિની ॥ ૬॥

ઇન્દ્રાદિદેવતાવૃન્દસ્તૂયમાનાત્મવૈભવા ।
વિશુદ્ધિદા ભયહરા ભક્તદ્વેષીક્ષયઙ્કરી ॥ ૭॥

ભવપાશવિનિર્મુક્તા ભેરુણ્ડા ભૈરવાર્ચિતા ।
બલભદ્રપ્રિયાકારાહાલામદરસોધૃતા ॥ ૮॥

પઞ્ચભૂતશરીરસ્થા પઞ્ચકોશપ્રપઞ્ચહૃત્ ।
સિંહવાહા મનોમોહા મોહપાશનિકૃન્તની ॥ ૯॥

મદિરા મદિરોન્માદમુદ્રા મુદ્ગરધારિણી ।
સાવિત્રી પ્રસાવિત્રી ચ પરપ્રિયવિનાયકા ॥ ૧૦॥

યમદૂતી પિઙ્ગનેત્રા વૈષ્ણવી શાઙ્કુરી તથા ।
ચન્દ્રપ્રિયા ચન્દનસ્થા ચન્દનારણ્યવાસિની ॥ ૧૧॥

વદનેન્દુપ્રભાપૂર પૂર્ણબ્રહ્માણ્ડમણ્ડલા ।
ગાન્ધર્વી યક્ષશક્તિશ્ચ કૈરાતી રાક્ષસી તથા ॥ ૧૨॥

પાપપર્વતદમ્ભોલિર્ભયધ્વાન્તપ્રભાકરા ।
સૃષ્ટિસ્થિત્યુપસંહારકારિણિ કનકપ્રભા ॥ ૧૩॥

લોકાનાં દેવતાનાઞ્ચ યોષિતાં હિતકારિણી ।
બ્રહ્માનન્દૈકરસિકા મહાવિદ્યા બલોન્નતા ॥ ૧૪॥

મહાતેજોવતી સૂક્ષ્મા મહેન્દ્રપરિપૂજિતા ।
પરાપરવતી પ્રાણા ત્રૈલોક્યાકર્ષકારિણી ॥ ૧૫॥

કિરીટાઙ્ગદકેયૂરમાલા મઞ્જિરભૂષિતા ।
સુવર્ણમાલાસઞ્જપ્તાહરિદ્રાસ્રક્ નિષેવિતા ॥ ૧૬॥

ઉગ્રવિઘ્નપ્રશમની દારિદ્ર્યદ્રુમભઞ્જિની ।
રાજચોરનૃપવ્યાલભૂતપ્રેતભયાપહા ॥ ૧૭॥

સ્તમ્ભિની પરસૈન્યાનાં મોહિની પરયોષિતામ્ ।
ત્રાસિની સર્વદુષ્ટાનાં ગ્રાસિની દૈત્યરાક્ષસામ્ ॥ ૧૮॥

આકર્ષિણી નરેન્દ્રાણાં વશિની પૃથિવીમૃતામ્ ।
મારિણી મદમત્તાનાં દ્વેષિણી દ્વિષિતાં બલાત્ ॥ ૧૯॥

ક્ષોભિણિ શત્રુસઙ્ઘાનાં રોધિની શસ્ત્રપાણિનામ્ ।
ભ્રામિણી ગિરિકૂટાનાં રાજ્ઞાં વિજય વર્દ્ધિની ॥ ૨૦॥

હ્લીં કાર બીજ સઞ્જાતા હ્લીં કાર પરિભૂષિતા ।
બગલા બગલાવક્ત્રા પ્રણવાઙ્કુર માતૃકા ॥ ૨૧॥

પ્રત્યક્ષ દેવતા દિવ્યા કલૌ કલ્પદ્રુમોપમા ।
કીર્ત્તકલ્યાણ કાન્તીનાં કલાનાં ચ કુલાલયા ॥ ૨૨॥

સર્વ મન્ત્રૈક નિલયા સર્વસામ્રાજ્ય શાલિની ।
ચતુઃષષ્ઠી મહામન્ત્ર પ્રતિવર્ણ નિરૂપિતા ॥ ૨૩॥

સ્મરણા દેવ સર્વેષાં દુઃખપાશ નિકૃન્તિની ।
મહાપ્રલય સઙ્ઘાત સઙ્કુટદ્રુમ ભેદિની ॥ ૨૪॥

ઇતિતે કથિતં બ્રહ્મન્નામસાહસ્રમુત્તમમ્ ।
અષ્ટોત્તરશતં ચાપિ નામ્નામન્તે નિરૂપિતમ્ ॥ ૨૫॥

કાશ્મીર કેરલ પ્રોક્તં સમ્પ્રદાયાનુસારતઃ ।
નામાનિજગદમ્બાયાઃ પઠસ્વકમલાસન ॥ ૨૬॥

તેનેમૌદાનવૌવીરૌસ્તબ્ધ શક્તિ ભવિષ્યતઃ ।
નાનયોર્વિદ્યતે બ્રહ્મનૂભયં વિદ્યા પ્રભાવતઃ ॥ ૨૭॥

ઈશ્વર ઉવાચ ।
ઇત્યુક્તઃ સતદાબ્રહ્મા પઠન્નામસહસ્રકમ્ ।
સ્તમ્ભયામાસ સહસા તયીઃ શક્તિપરાક્રમાત્ ॥ ૨૮॥

ઇતિતે કથિતં દેવિ નામસાહસ્રમુત્તમમ્ ।
પરં બ્રહ્માસ્ત્ર વિદ્યાયા ભુક્તિ મુક્તિ ફલપ્રદમ્ ॥ ૨૯॥

યઃ પઠેત્પાઠયેદ્વાપિ શ◌ૃણોતિ શ્રાવયેદિદમ્ ।
સ સર્વસિદ્ધિ સમ્પ્રાપ્ય સ્તમ્ભયેદખિલં જગત્ ॥ ૩૦॥

ઇતિ મે વિષ્ણુના પ્રોક્તં મહાસ્તમ્ભકરં પરમ્ ।
ધનધાન્ય ગજાશ્વાદિ સાધકં રાજ્યદાયકમ્ ॥ ૩૧॥

પ્રાતઃકાલે ચ મધ્યાહ્ને સન્ધ્યાકાલે ચ પાર્વતિ ।
એકચિત્તઃ પઠેદેતત્સર્વસિદ્ધિં ચ વિન્દતિ ॥ ૩૨॥

પઠનાદેકવારસ્ય સર્વપાપક્ષયો ભવેત્ ।
વારદ્વયસ્ય પઠનાદ્ગણેશ સદૃશો ભવેત્ ॥ ૩૩॥

ત્રિવારં પઠનાદસ્ય સર્વસિદ્ધ્યતિ નાન્યથા ।
સ્તવસ્યાસ્ય પ્રભાવેણ જીવન્મુક્તો ભવેન્નરઃ ॥ ૩૪॥

મોક્ષાર્થી લભતે મોક્ષં ધનાર્થી લભતે ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યાં વશ્યાર્થી વશયેજ્જગત્ ॥ ૩૫॥

મહીપતિર્વત્સરસ્ય પાઠાચ્છત્રુક્ષયો ભવેત્ ।
પૃથ્વીપતિર્વશસ્તસ્ય  વત્સરાત્સ્મરસુન્દરઃ ॥ ૩૬॥

ય પઠેત્સર્વદા ભક્ત્યા શ્રીયુક્તો ભવતિ પ્રિયે ।
ગણાધ્યક્ષઃ પ્રતિનિધિઃ કવિઃ કાવ્ય ઇવાપરઃ ॥ ૩૭॥

ગોપનીયં પ્રયત્નેન જનનીજારવત્પ્રિયે ।
શક્તિયુક્તઃ પઠેન્નિત્યં પીતામ્બરધરઃ સ્વયમ્ ॥ ૩૮॥

ય ઇદં પઠતે નિત્યં શિવેન સદૃશો ભવેત્ ।
ધર્માર્થકામમોક્ષાણાં પતિર્ભવતિ માનવઃ ॥ ૩૯॥

સત્યં સત્યં મયા દેવિ રહસ્યં સમ્પ્રકાશિતમ્ ।
સ્તવસ્યાસ્ય પ્રભાવેન કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૪૦॥

સ્તમ્ભિતાવાસ્કરાઃ સર્વે સ્તવરાજસ્ય કીર્ત્તનાત્ ।
મધુ કૈટભ દૈતેન્દ્રૌધ્વસ્તશક્તિ બભૂવતુઃ ॥ ૪૧॥

ઇદં સહસ્રનામાખ્યં સ્તોત્રં ત્રૈલોક્ય પાવનમ્ ।
એતત્પઠતિ યો મન્ત્રી ફલં તસ્ય વદામ્યહમ્ ॥ ૪૨॥

રાજાનો વશ્યતાં યાન્તિ યાન્તિ પાપાનિ સંક્ષયઃ ।
ગિરયઃ સમતાં યાન્તિ વહ્નિર્ગચ્છતિ શીતતામ્ ॥ ૪૩॥

પ્રચણ્ડા સૌમ્યતાં યાન્તિ શોષયાન્ત્યેવ સિન્ધવઃ ।
ધનૈઃ કોશા વિવર્ધતે જનૈશ્ચ વિવિધાલયાઃ ॥ ૪૪॥

મન્દિરાઃ સ્કરગૈઃ પૂર્ણા હસ્તિશાલાશ્ચ હસ્તિભિઃ ।
સ્તમ્ભયેદ્વિષતાં વાચં ગતિં શસ્ત્રં પરાક્રમમ્ ॥ ૪૫॥

રવેરથં સ્તમ્ભયતિ સઞ્ચારં ચ નભસ્વતઃ ।
કિમન્યં બહુનોક્તેન સર્વકાર્યકૃતિ ક્ષયમ્ ॥ ૪૬॥

સ્તવરાજમિદં જપ્ત્વા ન માતુર્ગર્ભગો ભવેત્ ।
તેનેષ્ટાક્રતવઃ સર્વે દત્તાદાનપરમ્પરાઃ ॥ ૪૭॥

વ્રતાનિ સર્વાણ્યાતાનિયેનાયં પઠ્યતે સ્તવઃ ।
નિશીથકાલે પ્રજપેદેકાકી સ્થિર માનસઃ ॥ ૪૮॥

પીતામ્બરધરી પીતાં પીતગન્ધાનુલેપનામ્ ।
સુવર્ણરત્નખચિતાં દિવ્ય ભૂષણ ભૂષિતામ્ ॥ ૪૯॥

સંસ્થાપ્ય વામભાગેતુ શક્તિં સ્વામિ પરાયણામ્ ।
તસ્ય સર્વાર્થ સિદ્ધિઃસ્યાદ્યદ્યન્મનસિ કલ્પતે ॥ ૫૦॥

બ્રહ્મહત્યાદિ પાપાનિ નશ્યન્તેસ્યજપાદપિ ।
સહસ્રનામ તન્ત્રાણાં સારમાકૃત પાર્વતિ ॥ ૫૧॥

મયા પ્રોક્તં રહસ્યં તે કિમન્ય શ્રોતુમર્હસિ ॥ ૫૨॥

॥ ઇતિ શ્રીઉત્કટ શમ્બરે નાગેન્દ્રપ્રયાણ તન્ત્રે
ષોડશ સાહસ્રગ્રન્થે વિષ્ણુ શઙ્કર સંવાદે
શ્રીપીતામ્બરા અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIpItAmbarAShTottarashatanAmastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*